ব্রাহ্মীবর্ণমালায়াঃ পাঠোদ্ধারস্য ইতিহাসঃ বিব্রিয়তাম্।

প্রথমতঃ খ্রিস্টিয়ে ১৩৬৮ অব্দে ফিরোজ-শাহ-তুঘলক্-মহোদয়ৈঃ ব্রাহ্মীলিপীনাং পাঠোদ্ধারায় প্রযাসো বিহিতঃ। তেন টোপ্‌রা মিরাট চেতি ক্ষেত্রযোঃ অশোকরাজস্য স্তম্ভদ্বয়ং দিল্লীনগরমানীতম্। পণ্ডিতাঃ তযোঃ পাঠোদ্ধারায় নিযোজিতাস্তেন। পরন্তু তেষাং প্রযাসা ন সফলীভূতাঃ। মুঘলসম্রাজা আকবরেণ চ পুনরেব স্তম্ভদ্বয়স্য পাঠনিরূপণং কর্ত্তুমিষ্টম্, তস্য প্রযাসো'পি তু ব্যর্থো জাতঃ।

কলিকাতানগর্যাম্ ঈশবীয়ে ১৭৮৪ অব্দে 'এশিয়াটিক্-সোসাইটি' ইতি বিদ্যাচর্যাকেন্দ্রে স্থাপিতে সতি সুষ্ঠু–বৈজ্ঞানিকমার্গানুসারম্ অভিলেখাদীনাং পাঠনিরূপণাদিকার্যপরিচালনে সমুচিতঃ কেন্দ্রীযোদ্যোগঃ সূচিতঃ। ততঃ অভিলেখপাঠে সার্থকপ্রযাসশ্চ দৃষ্টঃ ঈশবীয়ে ১৭৮৫ অব্দে চার্লস-উইল্‌কিন্স মহোদযকৃতে বাদালস্তম্ভলিপেঃ পাঠনিরূপণে। পন্ডিতরাধাকান্তশর্মণা চ চাহমানরাজস্য বীসলদেবস্য দিল্লী-টোপ্‌রাস্তম্ভলিপেঃ পাঠোদ্ধারঃ কৃতঃ। ইত্যবসরে জে. এইচ্ হেরিংটন্-মহাভাগৈঃ নাগার্জুনী ইতি স্থানাত্ বিহারপ্রদেশস্য বরাবর-পর্বতগুহাযাশ্চ মৌখরিরাজস্য অনন্তবর্মণো'ভিলেখত্রযমাবিষ্কৃতম্। তেষামভিলেখানাং পাঠনির্ণযায তু সঃ ন সমর্থো'ভবৎ। অথ চার্লস্- উইলিকন্সমহাভাগৈঃ খ্রিস্টিয়ে ১৭৮৯ অব্দে তেষাং পাঠঃ নিরূপিতঃ। উইলকিন্স-মহাভাগৈশ্চ গুপ্তরাজানাম্ অভিলেখেষু লব্ধানাং কেষাংচিত্ বর্ণানাম্ পাঠো'পি নির্ণীতঃ। ঈশবীয়ে ১৮৩৪ অব্দে ক্যাপ্টেন-ট্রযারমহাভাগঃ সমুদ্রগুপ্তস্য এলাহাবাদস্তম্ভলিপেরাংশিকং পাঠং নিরূপযতি স্ম।

ইত্যবসরে ডঃ মিল্‌মহোদযৈঃ স্কন্দগুপ্তস্য ভিতরিস্তম্ভলিপেঃ পাঠঃ কার্ত্স্ন্যেনৈব নিরূপিতঃ। জেমস্-প্রিন্সেপ্‌মহোদযৈঃ গুপ্তবর্ণমালাযাঃ সম্পূর্ণা কাচিৎ সারণী নির্মিতা। সা চ গুপ্তযুগীযাভিলেখাশ্রিতা। কস্যাংচিৎ দ্বৈভাষিকমুদ্রাযামুৎকীর্ণম্ ইন্দোগ্রীকরাজস্য 'আগাথোক্লেস্' ইত্যস্য নাম ক্রিশ্চিযান্ লাসেন্ মহোদযৈঃ পঠিতম্ ঈশবীয়ে ১৮৩৫-১৮৩৬ বা অব্দে। এতত্সহাযেন চ কতিপযেষু অভিলেখেষু এতত্কালপর্যন্তম্ অনির্ণীতানাং কতিপযানাং বর্ণানাং পাঠো'পি নিরূপিতঃ। সৌরাষ্ট্রাঞ্চলে প্রাপ্তাসু পশ্চিমক্ষত্রপাণাং কতিপযাসু মুদ্রাসু অঙ্কিতাক্ষরাণি ব্রাহ্মীলিপেঃ পাঠনিরূপণায প্রিন্সেপ্‌মহাভাগস্য সহাযভূতানি। প্রিন্সেপ্‌মহাভাগৈশ্চ ততঃ সাঁচীনগরে ক্ষুদ্রেষু স্তূপেষু লিখিতেষু 'দানম্' ইতি পদস্য পাঠোদ্ধারঃ কৃতঃ। এবং চ 'দ', 'ন', 'অনুস্বার'শ্চ ইতি বর্ণত্রযং চিহ্নিতম্। দিল্লীটোপ্‌রাস্তম্ভালিপ্যাঞ্চ আদ্যে

Scanned with CamScanner

শব্দে 'দ', 'ন' চেতি বর্ণদ্বয়ং দৃষ্টম্। 'দানম্' ইতি পদাত্ প্রাক্ দানকর্ত্তুঃ ষষ্ঠ্যন্তপদাত্মকস্য নাম্নঃ অন্তিমবর্ণত্বেন 'স' ইতি বর্ণো নিরূপিতঃ। 'স' ইতি প্রাকৃতভাষাযাং ষষ্ঠ্যেকবচনস্য বিভক্তিচিহ্নমিতি। ঈশবীযে ১৮৬৭ অব্দে প্রিন্সেপ্‌মহাভাগা ব্রাহ্মীলিপেঃ এতদাবিষ্কারবৃত্তান্তং কানিংহামমহাভাগেভ্যঃ জ্ঞাপিতবন্তঃ।

ক্রমেণ চ সম্রাজঃ অশোকস্য বহূনামেব অভিলেখানাং পাঠঃ প্রিন্সেপমহোদযৈঃ নির্ণীতঃ ব্রাহ্মীবর্ণমালাযাঃ সারণী চ নির্মিতা।

সামান্যতঃ অযমেব ব্রাহ্মীলিপেঃ পাঠোদ্ধারবৃত্তান্তঃ।

Scanned with CamScanner